तृतीयः पाठः
३

# संस्कृतदिवसः

( पञ्चमीविभक्तिः )




**धीरजः** – भोः मित्र! अद्य अहं प्रभाते ''जयतु संस्कृतं, जयतु भारतम्'' ''संस्कृतभाषा अस्माकं भाषा'' इत्यादीनि उद्घोषवाक्यानि श्रुतवान्। किम् इदम्? के कृतवन्तः? किमर्थं कृतवन्तः? इति विस्तरेण वद।

**जयेशः** – किं भवान् न जानाति? अद्य संस्कृतदिवसः। श्रावणमासस्य पूर्णिमायां तिथौ संस्कृतदिवसः आचर्यते। अस्मिन् एव दिने रक्षा– बन्धनोत्सवः अपि भवति।

**धीरजः** – संस्कृतदिवसस्य रक्षाबन्धनोत्सवस्य च मध्ये कोऽपि सम्बन्धः अस्ति किम्?

**जयेशः** – आम्, अस्ति। प्राचीनकाले श्रावणपूर्णिमादिने गुरुकुलेषु अध्ययनस्य आरम्भः भवति स्म। अत्र गुरवः शिष्याणां हस्तेषु शिष्याश्च गुरूणां हस्तेषु रक्षासूत्राणि बध्नन्ति स्म। परस्परं रक्षाकामनाञ्च कुर्वन्ति। तदा आरभ्य अस्मिन् दिने वयं रक्षाबन्धनोत्सवम् आचरामः।

**इन्द्रेशः** – साधु, उक्तं त्वया। किन्तु अस्मिन् दिने संस्कृतदिवसः कथम्?

**जयेशः** – पूर्वं सर्वे अध्ययनस्य आरम्भे वेदाध्ययनम् एव कुर्वन्ति स्म। वेदास्तु संस्कृतेन एव लिखिताः सन्ति अतः संस्कृतस्य आरम्भकारणात् एतद् दिनं 'संस्कृतदिवसः' इति मन्यते।

**इन्द्रेशः** – तर्हि अस्मिन् दिने किं किम् आयोजनं भवति?

**जयेशः** – अत्र प्रातः बालाः मिलित्वा उद्घोषवाक्यानि वदन्तः वीथिषु प्रभाते भ्रमणं कुर्वन्ति। संस्कृतवाक्यैः अभिवादनं चर्चां च कुर्वन्ति। स्थाने स्थाने समारोहाः भवन्ति। संस्कृतविदुषां सम्मानकार्यक्रमाः भवन्ति। विद्यालयेषु श्लोकपाठप्रतियोगिता, नाटकप्रतियोगिता, प्रश्नमञ्चः, कथाकथनम्, श्रुतिलेखः, गीतप्रतियोगिता इत्यादयः प्रतियोगिताः भवन्ति। यदा एते कार्यक्रमाः सप्ताहं यावत् भवन्ति स संस्कृतसप्ताहः उच्यते।

**सुधीरः** – एताः प्रतियोगिताः सर्वेषु विद्यालयेषु भवन्ति किम् ?

**जयेशः** – आम्।

**इन्द्रेशः** – तेन तु छात्राणां मध्ये एव जागरुकता भवति। संस्कृतं प्रति समाजे कथम् अनुरागः भवेत्।

**धीरजः** – तदर्थं वयं एताः प्रतियोगिताः च समाजेऽपि आयोजयाम, तदा तेऽपि सहभागिनः जागरुकाश्च भविष्यन्ति। शोभायात्रा तु करणीया एव।




**इन्द्रेशः** – मित्र! एतत् सर्वं तु करणीयमेव। अद्य आरभ्य आवां संस्कृतेन सम्भाषणं कुर्वः। तेन एषा भाषा सरला अस्ति, सरसा अस्ति अस्माकं च भाषा अस्ति इति सर्वेषां मनसि भावः भविष्यति ।

**धीरजः** – आम्। बन्धो! संस्कृतम् अस्माकं भारतीयानां गौरवम् अभिज्ञानं च अस्ति। संस्कृतेन विना अस्माकं भारतीयानां किम् अस्तित्वम् ?

**इन्द्रेशः** – इयम् तु अस्माकं पूर्वजानां अपि भाषा अस्ति।

**सुधीरः** – आम् सत्यम्।

**जयेशः** – सत्यमेव।

**इन्द्रेशः** – तर्हि तत्र अम्बेडकरसभागारे संस्कृतसप्ताहकार्यक्रमः प्रचलति तत्र चलावः । आम् चलावः।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| प्रभाते | प्रातःकाले | प्रातःकाल में |
| किमर्थम् | केन कारणेन | किसलिए |
| विस्तरेण | विस्तारपूर्वकम् | विस्तार से |
| बध्नन्ति स्म | बन्धनं कुर्वन्ति स्म | बाँधते थे |
| आचरामः | आचरणं कुर्मः | आचरण करें |
| साधु | उचितम् | ठीक |
| अभिवादनम् | नमस्कारः | अभिवादन |
| जागरुकता | जागृतिः | जागरुकता |
| अभिज्ञानम् | लक्षणचिह्नम् | पहचान |

## अभ्यासः

**१. निम्नलिखितपदानाम् उच्चारणं कुरुत -**

| | | | |
|---|---|---|---|
| इत्यादीनि | संस्कृतदिवसः | पूर्णिमायाम् | बन्धनोत्सवः |
| रक्षाबन्धनोत्सवस्य | प्रतियोगिताः | गौरवम् | अस्तित्वम् |

**२. एकपदेन उत्तरत -**

(क) श्रावणपूर्णिमायां कः उत्सवः भवति ?

(ख) आचार्याः शिष्याणां हस्तेषु किं बध्नन्ति ?

(ग) वेदाः कया भाषया लिखिताः सन्ति ?

(घ) प्रतियोगिताः कुत्र आयोजनीयाः ?

(ङ) अस्माकं भारतीयानां गौरवं किम् ?

३. **एकवाक्येन उत्तरत -**

(क) संस्कृतसप्ताहस्य आचरणं कदा भवति ?

(ख) संस्कृतसप्ताहे के कार्यक्रमाः भवन्ति ?

(ग) संस्कृतदिवसे केषां सम्मानः भवति ?

(घ) आवां केन सम्भाषणं कुर्वः ?

(ङ) पूर्वं कुत्र अध्ययनं भवति स्म ?

४. **सुसङ्गतपदानि मेलयत -**

| | | |
|---|---|---|
| (क) दीपावली | - | श्रावणपूर्णिमा |
| (ख) रक्षाबन्धनम् | - | कार्तिकामावस्या |
| (ग) गीताजयन्ती | - | भाद्रपदकृष्णाष्टमी |
| (घ) कृष्णजन्माष्टमी | - | मार्गशीर्षशुक्ल एकादशी |
| (ङ) श्रीगणेशचतुर्थी | - | भाद्रपदशुक्लचतुर्थी |

५. **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| शोभायात्रा, जयतु संस्कृतम्, पूर्णिमा, संस्कृतवाक्यैः, आचार्याः |
|---|

(क) श्रावणमासस्य .............................. तिथौ संस्कृतदिवसः भवति ।

(ख) अहं प्रातः .................................... इति उद्घोषवाक्यं श्रुतवान् ।

(ग) ............................... शिष्याणां हस्तेषु रक्षासूत्राणि बध्नन्ति स्म ।

(घ) संस्कृतदिवसे .................................... जनाः अभिवादनं चर्चां च कुर्वन्ति ।

(ङ) ........................................... तु करणीया एव ।

६. **चित्राधारेण पञ्चमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत -**




बालकः <u>वृक्षात्</u> पतति ।




आम्रं <u>शाखायाः</u> पतति ।

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा-** | वृक्षः | - | वृक्षात् | गृहम् | - | गृहात् |
| | हस्तः | - | ...................... | मन्दिरम् | - | ................... |
| | आकाशः | - | ...................... | यानम् | - | ................... |
| **यथा-** | शाखा | - | शाखायाः | कूपी | - | कूप्याः |
| | माला | - | ...................... | जननी | - | ................... |
| | चन्द्रिका | - | ...................... | नगरी | - | ................... |

## ७. कोष्ठके प्रदत्तशब्दस्य समुचितरूपं संयोज्य वाक्यानि वदत -

(क) जलम् .................................. पतति। (आकाशः)

(ख) कृषकः ............................ आगच्छति। (क्षेत्रम्)

(ग) महिला ............................ आगच्छति। (नदी)

(घ) ............................... फलानि पतन्ति। (वृक्षः)

(ङ) वस्त्राणि ............................... पतन्ति। (कपाटिका)

## ८. रिक्तस्थानानि पूरयत -

| | पदम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| **यथा-** | वृक्षः | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| | ग्रामः | ............... | ............... | ............... |
| | युवकः | ............... | ............... | ............... |
| **यथा-** | महिला | महिलायाः | महिलाभ्याम् | महिलाभ्यः |
| | वाटिका | ............... | ............... | ............... |
| | जवनिका | ............... | ............... | ............... |
| **यथा-** | लेखनी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |
| | मार्जनी | ............... | ............... | ............... |
| | अङ्गुली | ............... | ............... | ............... |
| | फलम् | फलात् | फलाभ्याम् | फलेभ्यः |
| | नगरम् | ............... | ............... | ............... |
| | नेत्रम् | ............... | ............... | ............... |

९. एतेषु वाक्येषु रेखांकितपदानां द्विवचने बहुवचने च प्रयोगं कृत्वा वाक्यानि रचयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | वृक्षात् फलानि पतन्ति | वृक्षाभ्याम् फलानि पतन्ति | वृक्षेभ्यः फलानि पतन्ति |
| (क) | ग्रामात् जनाः आगच्छन्ति | .............................. | .............................. |
| (ख) | पुस्तकात् पत्राणि पतन्ति | .............................. | .............................. |
| (ग) | बालाः विद्यालयात् आगच्छन्ति | .............................. | .............................. |
| (घ) | छात्राः पाठशालायाः गच्छन्ति | .............................. | .............................. |
| (ङ) | महिलाः नद्याः जलम् आनयन्ति | .............................. | .............................. |

## योग्यता-विस्तारः

१. संस्कृतभाषायाः लेखनस्य सम्भाषणस्य च अभ्यासाय एतानि कार्याणि करणीयानि -

- आकाशवाण्याः संस्कृतवार्ताश्रवणम्।
- दूरदर्शने संस्कृतवार्ताः, वार्तावली, संस्कृतनाटकानि इत्यादीनां श्रवणं दर्शनञ्च।
- संस्कृतसम्भाषणशिविरम्।
- संस्कृतव्याकरणाभ्यासवर्गः।
- भाषाबोधनवर्गः।
- शिक्षकप्रशिक्षणवर्गः।
- संस्कृतमासपत्रिकाःपठनीयाः। यथा-भारती, सम्भाषण-सन्देशः इत्यादिन्यः अन्याः अपि।
- दैनिकसंस्कृतवार्तापत्रपठनम्- सुधर्मा इति।
- प्रतिदिनं संस्कृतरचनालेखनम्।
- संस्कृतेन वार्तालापस्य आरम्भः।
- लघुलेखस्य लेखनम्।
- अनुलेखस्य लेखनम्।

२. पञ्चमीविभक्तेः सर्वनामशब्दरूपाणि अपि जानीम -

| | शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पुँल्लिङ्गे नपुंसकलिङ्गे च | तत् | तस्मात् | ताभ्याम् | तेभ्यः |
| | एतत् | एतस्मात् | एताभ्याम् | एतेभ्यः |
| | किम् | कस्मात् | काभ्याम् | केभ्यः |
| | भवत् | भवतः | भवद्भ्याम् | भवद्भ्यः |
| स्त्रीलिङ्गे | तत् | तस्याः | ताभ्याम् | ताभ्यः |
| | एतत् | एतस्याः | एताभ्याम् | एताभ्यः |
| | किम् | कस्याः | काभ्याम् | काभ्यः |
| | भवत् | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| त्रिषु लिङ्गेषु | अस्मद् | मत् | आवाभ्याम् | अस्मत् |
| | युष्मद् | त्वत् | युवाभ्याम् | युष्मत् |